॥ श्रीगुरुभ्यो नमः ॥

कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

चतुर्थकाण्डे सप्तमः प्रश्नः

वसोर्धारादिशिष्टसंस्काराभिधानं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

अग्ना॑विष्णू स॒जोष॑से॒मा व॑र्द्धन्तु वा॒ङ्गि॑रः। द्यु॒म्नैर् वाजे॑भि॒रा ग॑तम्॥ वाज॑श्च मे प्रस॒वश्च॑ मे॒ प्रय॑तिश्च मे॒ प्रसि॑तिश्च मे धी॒तिश्च॑ मे॒ क्रतु॑श्च मे॒ स्वर॑श्च मे॒ श्लोक॑श्च मे श्रा॒वश्च॑ मे॒ श्रुति॑श्च मे॒ ज्योति॑श्च मे॒ सुव॑श्च मे प्रा॒णश्च॑ मेऽपा॒न ॥ [१] ॥ श्च॑ मे व्या॒नश्च॒ मेऽसु॑श्च मे चि॒त्तञ्च॑ म॒ आधी॑तञ्च मे॒ वाक् च॑ मे॒ मन॑श्च मे॒ चख्षु॑श्च मे॒ श्रोत्र॑ञ्च मे॒ दख्ष॑श्च मे॒ बल॑ञ्च म॒ ओज॑श्च मे॒ सह॑श्च म॒ आयु॑श्च मे ज॒रा च॑ म आ॒त्मा च॑ मे त॒नूश्च॑ मे॒ शर्म॑ च मे॒ वर्म॑ च॒ मेऽङ्गा॑नि च मे॒ऽस्थानि॑ च मे॒ परूꣳ॑षि च मे॒ शरी॑राणि च मे ॥ [२] ॥

(अ॒पा॒न स्त॒नूश्च॑ मे॒ ऽष्टाद॑श च) ॥ १ ॥

ज्यैष्ठ्य॑ञ्च म॒ आधि॑पत्यञ्च मे म॒न्युश्च॑ मे॒ भाम॑श्च मेऽम॑श्च॒ मेऽम्भ॑श्च मे जे॒मा च॑ मे महि॒मा च॑ मे वरि॒मा च॑ मे प्रथि॒मा च॑ मे व॒र्ष्मा च॑ मे द्राघु॒या च॑ मे वृ॒द्धञ्च॑ मे॒ वृद्धि॑श्च मे स॒त्यञ्च॑ मे श्र॒द्धा च॑ मे॒ जग॑च्च ॥ [३] ॥ मे॒ धन॑ञ्च मे॒ वश॑श्च मे॒ त्विषि॑श्च मे क्री॒डा च॑ मे॒ मोद॑श्च मे जा॒तञ्च॑ मे जनि॒ष्यमा॑णञ्च मे सू॒क्तञ्च॑ मे सुकृ॒तञ्च॑ मे वि॒त्तञ्च॑ मे॒ वेद्य॑ञ्च मे भू॒तञ्च॑ मे भवि॒ष्यच्च॑ मे सु॒गञ्च॑ मे सु॒पथ॑ञ्च म ऋ॒द्धञ्च॑ म॒ ऋद्धि॑ श्च मे कॢ॒प्तञ्च॑ मे॒ कॢप्ति॑श्च मे म॒तिश्च॑ मे सुम॒तिश्च॑ मे ॥ [४] ॥

(जग॒च्च र्द्धि॑ श्चतु॑र्दश च) ॥ २ ॥

शञ्च मे मयश्च मे प्रियञ्च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रञ्च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणञ्च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वञ्च ॥ [५] ॥ मे महश्च मे संविच्च मे ज्ञात्रञ्च मे सूश्च मे प्रसूश्च मे सीरञ्च मे लयश्च म ऋतञ्च मे ऽमृतञ्च मेऽयक्ष्मञ्च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वञ्च मेऽनमित्रञ्च मेऽभयञ्च मे सुगञ्च मे शयनञ्च मे सूषा च मे सुदिनञ्च मे ॥ [६] ॥

(विश्वञ्चशयनमष्टौ च) ॥ ३ ॥

ऊर्क् च मे सूनृता च मे पयश्च मे रसश्च मे घृतञ्च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रञ्च म औद्भिद्यञ्च मे रयिश्च मे रायश्च मे पुष्टञ्च मे पुष्टिश्च मे विभु च ॥ [७] ॥ मे प्रभु च मे बहु च मे भूयश्च मे पूर्णञ्च मे पूर्णतरञ्च मे ऽक्षितिश्च मे कूयवाश्च मेऽन्नञ्च मे ऽक्षुच्च मे व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे गोधूमाश्च मे मसुरा श्च मे प्रियंगवश्च मेऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे ॥ [८] ॥

(विभु च मसुरा श्चतुर्दश च) ॥ ४ ॥

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यञ्च मे ऽयश्च मे सीसञ्च मे त्रपुश्च मे श्यामञ्च मे लोहञ्च मेऽग्निश्च म आपश्च मे वीरुधश्च म ओषधयश्च मे कृष्टपच्यञ्च ॥ [९] ॥ मेऽकृष्टपच्यञ्च मे ग्राम्याश्च मे पशव आरण्याश्च यज्ञेन कल्पन्तांवित्तञ्च मे वित्तिश्च मे भूतञ्च मे भूतिश्च मे वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मे ऽर्थश्च म एमश्च म इतिश्च मे गतिश्च मे ॥ [१०] ॥

(कृष्टपच्यञ्चा ष्टाचत्वारिंशच्च) ॥ ५ ॥

अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे सविता च म इन्द्रश्च मे सरस्वती च म इन्द्रश्च मे पूषा च म इन्द्रश्च मे बृहस्पतिश्च म इन्द्रश्च मे मित्रश्च म इन्द्रश्च मे वरुणश्च म इन्द्रश्च मे त्वष्टा च ॥ [११] ॥ म इन्द्रश्च मे धाता च म इन्द्रश्च मे विष्णुश्च म इन्द्रश्च मेऽश्विनौ च म इन्द्रश्च मे मरुतश्च म इन्द्रश्च मे विश्वे च मे देवा इन्द्रश्च मे पृथिवी च म इन्द्रश्च मेऽन्तरिक्षञ्च म इन्द्रश्च मे द्यौश्च म इन्द्रश्च मे दिशश्च म इन्द्रश्च मे मूर्द्धा च म इन्द्रश्च मे प्रजापतिश्च म इन्द्रश्च मे ॥ [१२] ॥

(त्वष्टा चद्यौश्च मएकविꣳशतिश्च) ॥ ६ ॥

अꣳशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च म उपाꣳशुश्च मेऽन्तर्यामश्च म ऐन्द्रवायवश्च मे मैत्रावरुणश्च म आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च म आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च म ऋतुग्रहाश्च [ ] १३ ॥ [१३] ॥ मेऽतिग्राह्याश्च म ऐन्द्राग्नश्च मे वैश्वदेवश्च मे मरुत्वतीयाश्च मे माहेन्द्रश्च म आदित्यश्च मे सावित्रश्च मे सारस्वतश्च मे पौष्णश्च मे पात्नीवतश्च मे हारियोजनश्च मे ॥ [१४] ॥

(ऋतुग्रहाश्च चतुस्त्रिꣳशाच्च) ॥ ७ ॥

इध्मश्च मे बर्हिश्च मे वेदिश्च मे धिष्णियाश्च मे स्रुचश्च मे चमसाश्च मे ग्रावाणश्च मे स्वरवश्च म उपरवाश्च मेऽधिषवणे च मे द्रोणकलशश्च मे वायव्यानि च मे पूतभृच्च म आधवनीयश्च म आग्नीध्रञ्च मे हविर्द्धानञ्च मे गृहाश्च मे सदश्च मे पुरोडाशाश्च मे पचताश्च मेऽवभृथश्च मे स्वगाकारश्च मे ॥ [१५] ॥

(गृहाश्च षोडश च) ॥ ८ ॥

अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मेऽदितिश्च मे दितिश्च मे द्यौश्च मे शक्करीरङ्गुलयो दिशश्च मे यज्ञेन कल्पन्तामृक् च मे साम च मे स्तोमश्च मे

यजुश्च मे दीक्षा च मे तपश्च म ऋतुश्च मे व्रतञ्च मेऽहोरात्रयोँर् वृष्ट्या बृहद्रथन्तरे च मे यज्ञेन कल्पेताम् ॥ [१६] ॥

(दीक्षा ऽष्टादश च) ॥ ९ ॥

गर्भाँश्च मे वथ्साश्च मे त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च मे दित्यौही च मे पञ्चाविश्च मे पञ्चावी च मे त्रिवथ्सश्च मे त्रिवथ्सा च मे तुर्यवाट् च मे तुर्यौही च मे पष्ठवाच् च मे पष्ठौही च म उक्षा च मे वशा च म ऋषभश्च ॥ [१७] ॥ मे वेहच्च मेऽनड्वान् च मे धेनुश्च म आयुर् यज्ञेन कल्पताम्प्राणो यज्ञेन कल्पता मपानो यज्ञेन कल्पताँव्यानो यज्ञेन कल्पतां चक्षुर् यज्ञेन कल्पताङ्ँ श्रोत्रँय्यँज्ञेन कल्पतां मनो यज्ञेन कल्पताँव्वाग् यज्ञेन कल्पतामात्मा यज्ञेन कल्पताँय्यँज्ञो यज्ञेन कल्पताम् ॥ [१८] ॥

(ऋषभश्च चत्वारिꣳशच्च) ॥ १० ॥

एका च मे तिस्रश्च मे पञ्च च मे सप्त च मे नव च म एकादश च मे त्रयोदश च मे पञ्चदश च मे सप्तदश च मे नवदश च म एकविꣳशतिश्च मे त्रयोविꣳशतिश्च मे पञ्चविꣳशतिश्च मे सप्तविꣳ-शतिश्च मे नवविꣳशतिश्च म एकत्रिꣳशच्च मे त्रयस्त्रिꣳशच्च ॥ [१९] ॥ मे चतस्रश्च मेऽष्टौ च मे द्वादश च मे षोडश च मे विꣳशतिश्च मे चतुर्विꣳशतिश्च मे ऽष्टाविꣳशतिश्च मे द्वात्रिꣳशच्च मे षट्त्रिꣳशच्च मे चत्वारिꣳशच्च मे चतुश्चत्वारिꣳशच्च मे ऽष्टाचत्वारिꣳशच्च मे वाजश्च प्रसवश्चापिजश्च क्रतुश्च सुवश्च मूर्द्धा च व्यश्नियश्चा न्त्यायनश्चान्त्यश्च भौवनश्च भुवनश्चाधिपतिश्च ॥ [२०] ॥

(त्रयस्त्रिꣳशच्च व्यश्निय एकादश च) ॥ ११ ॥

वाजो नः सप्त प्रदिशश्चतस्रो वा परावतः। वाजो नो विश्वैर् देवैर् धनसाताविहावतु॥ विश्वे अद्य मरुतो विश्व ऊती विश्वे भवन्त्वग्नयः समिद्धाः। विश्वे नो देवा अवसाऽऽगमन्तु विश्वमस्तु

द्रवि॑ण॒ँव्वाजो॑ अ॒स्मे॥ वाज॑स्य प्रस॒वन्दे॒वा रथै᳚र् याता हि॒र॒ण्ययैः᳚। अ॒ग्निरिन्द्रो॒ बृह॒स्पति॑र् म॒रुतः॒ सोम॑पीतये॥ वाजे॑वाजेऽवत वाजिनो नो॒ धने॑षु ॥ [२१] ॥ विप्रा अमृता ऋतज्ञाः। अ॒स्य मद्ध्वः॑ पिबत मा॒दय॑द्ध्वन्तृ॒प्ता यात प॒थिभि॑र् दे॒वयानैः᳚॥ वाजः॑ पु॒रस्ता॑दु॒त म॑द्ध्य॒तो नो॒ वाजो॑ दे॒वाꣳ ऋ॒तुभिः॑ कल्पयाति। वाज॑स्य॒ हि प्र॑स॒वो नन्न॑मीति॒ विश्वा॒ आशा॒ वाज॑पतिर् भवेयम्॥ पयः॑ पृथि॒व्याम्पय॒ ओष॑धीषु॒ पयो॑ दि॒व्य॑न्तरि॑क्षे॒ पयो॑ धाम्। पय॑स्वतीः प्र॒दिशः॑ सन्तु॒ मह्य᳚म्॥ सम्मा॑ सृजामि॒ पय॑सा घृ॒तेन॒ सम्मा॑ सृजाम्य॒प ॥ [२२] ॥ ओष॑धीभिः। सो॑ऽह॒ँव्वाज॑ꣳ सनेयमग्ने॥ नक्तो॒षासा॒ सम॑नसा॒ विरू॑पे धा॒पये॑ते॒ शिशु॒मेक॑ꣳ समी॒ची। द्यावा॒ क्षामा॑ रु॒क्मो अ॒न्तर् वि भा॑ति दे॒वा अ॒ग्निन्धा॑रयन् द्रविणो॒दाः॥ स॒मु॒द्रो॑ऽसि॒ नभ॑स्वानार्द्रदा॑नुः श॒म्भूर् म॑यो॒भूर॒भि मा॑ वाहि॒ स्वाहा॑ मा॒रु॒तो॑ऽसि म॒रुता᳚ङ्ग॒णः श॒म्भूर् म॑यो॒भूर॒भि मा॑ वाहि॒ स्वाहा॑ऽव॒स्युर॑सि॒ दुव॑स्वाञ्छ॒म्भूर् म॑यो॒भूर॒भि मा॑ वाहि॒ स्वाहा᳚ ॥ [२३] ॥

(धने᳚ ष्व॒पो दु॒व॑स्वाञ्छ॒म्भूर्म॑यो॒भूर॒भि मा॒ द्वे च॑) ॥ १२ ॥

अ॒ग्निँय्युन॑ज्मि॒ शव॑सा घृ॒तेन॑ दि॒व्यꣳ सु॑प॒र्णँव्वय॑सा बृ॒हन्त᳚म्। तेन॑ व॒यम्प॑तेम ब्र॒ध्नस्य॑ वि॒ष्टप॑ꣳ सुवो॒ रुहा॑णा॒ अधि॒ नाक॑ उ॒त्तमे॥ इ॒मौ ते॑ प॒क्षाव॒जरौ॑ पत॒त्रिणो॒ याभ्या॒ꣳ रक्षा॑ꣳस्यप॒हꣳस्य॑ग्ने। ताभ्या᳚म्पतेम सु॒कृता॑मु लो॒कँय्यत्र॒र्षयः॑ प्रथम॒जा ये पु॑रा॒णाः॥ चिद॑सि समु॒द्रयो॑नि॒रिन्दु॑र् दक्षः॑ श्ये॒न ऋ॒तावा᳚। हिर॑ण्यपक्षः शकु॒नो भु॑र॒ण्युर् म॒हान्थ् स॒धस्थे᳚ ध्रुव ॥ [२४] ॥ आ निष॑त्तः॥ नम॑स्ते अस्तु॒ मा मा॑ हिꣳसीर् विश्व॑स्य मू॒र्द्धन्नधि॑ तिष्ठसि श्रि॒तः। स॒मु॒द्रे ते॒ हृद॑यम॒न्तरायु॒र् द्यावा॑पृथि॒वी भुव॑ने॒ष्वर्पि॑ते॥ उ॒द्नो द॑त्तोद॒धिम्भि॑न्त दि॒वः प॒र्जन्या॑द॒न्तरि॑क्षात् पृथि॒व्यास्ततो॑ नो॒ वृष्ट्या॑वत। दि॒वो मू॒र्द्धासि॑ पृथि॒व्या ना॒भिरू॒र्गपामोष॑धीनाम्। वि॒श्वायुः॒ शर्म॑ स॒प्रथा॒ नम॑स्प॒थे॥ येन॒र्षय॒स्तप॑सा स॒त्र ॥ [२५] ॥ मास॒तेन्धा॑ना अ॒ग्निꣳ सुव॑रा॒भर॑न्तः। तस्मि॑न्नहन्नि॒ द॑धे॒ नाके॑ अ॒ग्निमे॒तँय्यमा॒हुर् मन॑वः स्ती॒र्णब॑र्हिषम्॥ तम्पत्नी॑भि॒रनु॑ गच्छेम देवाः पु॒त्रैर् भ्रातृ॑भिरु॒त वा॒ हिर॑ण्यैः। नाक॑ङ्गृह्णा॒नाः सु॑कृ॒तस्य॑ लो॒के तृ॒तीये॑ पृ॒ष्ठे अधि॑ रोच॒ने दि॒वः॥ आ वा॒चो मद्ध्य॑मरुह-द्भुर॒ण्युर॒यम॒ग्निः सत्प॑ति॒श्चेकि॑तानः। पृ॒ष्ठे पृ॑थि॒व्या निहि॑तो॒ दवि॑द्युतदधस्प॒दङ्कृ॑णुते ॥ [२६] ॥ ये पृ॑त॒न्यवः॑॥ अ॒यम॒ग्निर् वी॒रत॑मो वयो॒धाः स॑ह॒स्रियो॑ दीप्यता॒मप्र॑युच्छन्। वि॒भ्राज॑मानः सरि-

रस्य मद्ध्य उप प्र यात दिव्यानि धाम॥ सम्प्र च्यवद्ध्वमनु सम्प्र यातान्ने पथो देवयानान् कृणुद्ध्वम्। अस्मिन्थ् सधस्थे अद्ध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत॥ येना सहस्रँव्वहसि येनाग्ने सर्ववेदसम्। तेनेमय्यँज्ञन्नो वह देवयानो य ॥ [२७] ॥ उत्तमः॥ उद्बुद्ध्यस्वाग्ने प्रति जागृह्येनमिष्टापूर्ते सꣳ सृजेथामयञ्च। पुनः कृण्वꣳस्त्वा पितरय्युँवानमन्वाताꣳसीत् त्वयि तन्तुमेतम्॥ अयन्ते योनिर्ऋत्वियो यतो जातो अरोचथाः। तञ्जानन्नग्न आ रोहाथा नो वर्द्धया रयिम् ॥ [२८] ॥

(ध्रुवः सत्रं कृणुते यः सप्तत्रिꣳशच्च) ॥ १३ ॥

ममाग्ने वर्चो विहवेष्वस्तु वयन्त्वेन्धाना स्तनुवम्पुषेम। मह्यन्नमन्ताम्प्रदिशश्चतस्र स्त्वयाऽद्ध्यक्षेण पृतना जयेम॥ मम देवा विहवे सन्तु सर्व इन्द्रावन्तो मरुतो विष्णुरग्निः। ममान्तरिक्षमुरु गोपमस्तु मह्यँव्वातः पवताङ्कामे अस्मिन्न्॥ मयि देवा द्रविणमा यजन्ताम्मय्याशीरस्तु मयि देवहूतिः। दैव्या होतारा वनिषन्त ॥ [२९] ॥ पूर्वेऽरिष्टाः स्याम तनुवा सुवीराः॥ मह्यय्यँजन्तु मम यानि हव्याऽऽकूतिः सत्या मनसो मे अस्तु। एनो मा नि गाङ्कतमच्चनाहव्विँश्वे देवासो अधि वोचता मे॥ देवीः षडुर्वीरुरु णः कृणोत विश्वे देवास इह वीरयद्ध्वम्। मा हास्महि प्रजया मा तनूभिर् मा रधाम द्विषते सोम राजन्न्॥ अग्निर् मन्युम्प्रतिनुदन् पुरस्ता ॥ [३०] ॥ ददब्धो गोपाः परि पाहि नस्त्वम्। प्रत्यञ्चो यन्तु निगुतः पुनस्तेऽमैषाञ्चित्तम्प्रबुधा वि नेशत्॥ धाता धातृणाम्भुवनस्य यस्पतिर् देवꣳ सवितारमभिमातिषाहम्। इमय्यँज्ञ मश्विनोभा बृहस्पतिर् देवाः पान्तु यजमानन्न्यर्थात्॥ उरुव्यचा नो महिषः शर्म यꣳसदस्मिन्हवे पुरुहूतः पुरुक्षु। स नः प्रजायै हर्यश्व मृडयेन्द्र मा ॥ [३१] ॥ नो रीरिषो मा परा दाः॥ ये नः सपत्ना अप ते भवन्त्विन्द्राग्निभ्यामव बाधामहे तान्। वसवो रुद्रा आदित्या उपरिस्पृशम्मोग्रञ्चेत्तारमधि राजमक्रन्न्॥ अर्वाञ्चमिन्द्रममुतो हवामहे यो गोजिद्धनजिदश्वजिद् यः। इमन्नो यज्ञव्विँहवे जुषस्वास्य कुर्मो हरिवो मेदिनन्त्वा ॥ [३२] ॥

(वनिषन्त पुरस्तान् मा त्रिचत्वारिꣳशच्च) ॥ १४ ॥

अग्नेर् मन्वे प्रथमस्य प्रचेतसो यम्पाञ्चजन्यम्बहवः समिन्धते। विश्वस्यांविशि प्रविविशिवाꣳसमीमहे स नो मुञ्चत्वꣳहसः॥ यस्येदम्प्राणन्निमिषद् यदेजति यस्य जातञ्जनमानञ्च केवलम्। स्तौम्यग्निन्नाथितो जोहवीमि स नो मुञ्चत्वꣳहसः॥ इन्द्रस्य मन्ये प्रथमस्य प्रचेतसो वृत्रघ्नः स्तोमा उपमामुपागुः। यो दाशुषः सुकृतो हवमुप गन्ता ॥ [३३] ॥ स नो मुञ्चत्वꣳहसः॥ यः संग्राममन्नयति सँवशी युधे यः पुष्टानि सꣳसृजति त्रयाणि। स्तौमीन्द्रन्नाथितो जोहवीमि स नो मुञ्चत्वꣳहसः॥ मन्वे वाम्मित्रावरुणा तस्य वित्तꣳ सत्यौजसा दृꣳहणा यन्नुदेथे। या राजानꣳ सरथँय्याथ उग्रा ता नो मुञ्चतमागसः॥ यो वाꣳ रथ ऋजुरश्मिः सत्यधर्मा मिथुश्चरन्तमुपयाति दूषयन्। स्तौमि ॥ [३४] ॥ मित्रावरुणा नाथितो जोहवीमि तौ नो मुञ्चतमागसः॥ वायोः सवितुर् विदथानि मन्महे यावात्मन्वद्बिभृतो यौ च रख्षतः। यौ विश्वस्य परिभू बभूवतुस्तौ नो मुञ्चतमागसः॥ उप श्रेष्ठा न आशिषो देवयोर् धर्मे अस्थिरन्न्। स्तौमि वायुꣳ सवितारन्नाथितो जोहवीमि तौ नो मुञ्चतमागसः॥ रथीतमौ रथीनामह्व ऊतये शुभङ्गमिष्ठौ सुयमेभिरश्वैः। ययोर् ॥ [३५] ॥ वान्देवौ देवेष्वनिशितमोजस्तौ नो मुञ्चतमागसः॥ यदयातँव्वहतुꣳ सूर्यायास्त्रिचक्रेण सꣳसदमिच्छमानौ। स्तौमि देवा वश्विनौ नाथितो जोहवीमि तौ नो मुञ्चतमागसः॥ मरुताम्मन्वे अधि नो ब्रुवन्तु प्रेमाँव्वाचँव्विश्वामवन्तु विश्वे। आशून्हुवे सुयमानूतये ते नो मुञ्चन्त्वेनसः॥ तिग्ममायुधँव्वीडितꣳ सहस्वद् दिव्यꣳ शर्द्धः ॥ [३६] ॥ पृतनासु जिष्णु। स्तौमि देवान् मरुतो नाथितो जोहवीमि ते नो मुञ्चन्त्वेनसः॥ देवानाम्मन्वे अधि नो ब्रुवन्तु प्रेमाँव्वाचं विश्वामवन्तु विश्वे। आशून्हुवे सुयमानूतये ते नो मुञ्चन्त्वेनसः॥ यदिदम्माऽभिशोचति पौरुषेयेण दैव्येन। स्तौमि विश्वान् देवान् नाथितो जोहवीमि ते नो मुञ्चन्त्वेनसः॥ अनु नोऽद्यानुमति >१, रन्वि ॥ [३७] ॥ दनुमते त्वं >२, वैश्वानरो न ऊत्या>३, पृष्टो दिवि> ४॥ ये अप्रथेताममितेभिरोजोभिर् ये प्रतिष्ठे अभवताँव्वसूनाम्। स्तौमि द्यावापृथिवी नाथितो जोहवीमि ते नो मुञ्चतमꣳहसः॥ उर्वी रोदसी वरिवः कृणोतङ्ख्षेत्रस्य पत्नी अधि नो ब्रूयातम्। स्तौमि द्यावापृथिवी नाथितो जोहवीमि ते नो मुञ्चतमꣳहसः॥ यत् ते वयम्पुरुषत्रा यविष्ठाविद्वाꣳसश्चकृमा कच्चन ॥ [३८] ॥ ऽऽगः। कृधी स्वस्माꣳ अदितेरनागा व्येनाꣳसि

शिश्रथो विष्वगग्ने॥ यथा ह तद् वसवो गौर्यञ्चित् पदि षितामुमुञ्चता यजत्राः। एवा त्वमस्मत्
प्र मुञ्चा व्यꣳहः प्रातार्यग्ने प्रतरान्न आयुः ॥ [३९] ॥
(गन्ता दूषयन्थ् स्तौमि ययोः शर्द्धो ऽनुमतिरनु चन चतुस्त्रिꣳशच्च) ॥ १५ ॥

समाप्ति कोर्वैः

(अग्नेर्मन्वेयस्येदमिन्द्रस्य यः सङ्ग्राममिन्द्रꣳ स नो मुञ्चत्वꣳ हसः)
(मन्वे वान्ता नो मुञ्चतमागसः)
(यो वां वायो रुपं रथीतमौ यदयात मश्विनौ तौ नो मुञ्चतमागसः)
(मरुतान् तिग्मं मरुतो देवानां यदिदंविश्वान् ते नो मुञ्चन्त्वेनसः)
(अनु न उर्वी द्यावापृथिवी ते नो मुञ्चतमꣳहसो यत्तौ)
(चतुरꣳहसः षडागसश्चतुरेनसो द्विरꣳहसः)
(अग्नाविष्णू ज्यैष्ठयꣳ शञ्चो वर्चोऽश्मा चा ऽग्निश्चाऽꣳशु श्चे दूध्म श्चाग्निश्च घर्मा गर्भा श्चैका च वाजो नो अग्निर्युनज्मि ममाऽग्ने अग्नेर्मन्वे पञ्चदश।)
(अग्नाविष्णू अग्निश्च वाजो नो अदब्धो गोपा नवत्रिꣳशत्)
(अग्नाविष्णू प्रतरान्न आयुः)
(युञ्जानो विष्णो रपाꣳ रश्मिर् नमो ऽश्म नग्नाविष्णू सप्त)

॥ हरिः ॐ ॥

चतुर्थकाण्डे सप्तमः प्रश्नः समाप्तः

अनुवाकाः	पञ्चशत्यः
१५	३९

ॐ